# Ribhuproktam Sarvanastitvanirupanam

# ઋભુપ્રોક્તં સર્વનાસ્તિત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Sarvanastitvanirupanam

File name : RRibhuproktaMsarvanAstitvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 8 | 81-85||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સર્વનાસ્તિત્વનિરૂપણમ્

(સર્વં નાસ્તિ)
(નિદાઘઋભુસંવાદે)
નાસ્તિ નાસ્ત્યેવ સઙ્કલ્પં નાસ્તિ નાસ્તિ જગત્રયમ્ ।
નાસ્તિ નાસ્તિ ગુરુર્નાસ્તિ નાસ્તિ શિષ્યોઽપિ વસ્તુતઃ ॥ ૮.૮૧॥

નાસ્તિ નાસ્તિ શરીરં ચ નાસ્તિ નાસ્તિ મનઃ ક્વચિત્ ।
નાસ્તિ નાસ્ત્યેવ કિઞ્ચિદ્વા નાસ્તિ નાસ્ત્યખિલં જગત્ ॥ ૮.૮૨॥

નાસ્તિ નાસ્ત્યેવ ભૂતં વા સર્વં નાસ્તિ ન સંશયઃ ।
"સર્વં નાસ્તિ" પ્રકરણં મયોક્તં ચ નિદાઘ તે ।
યઃ શૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૮.૮૩॥

વેદાન્તૈરપિ ચન્દ્રશેખરપદામ્ભોજાનુરાગાદરા-
દારોદારકુમારદારનિકરૈઃ પ્રાણૈર્વનૈરુજ્ઝિતઃ ।
ત્યાગાદ્યો મનસા સકૃત્શિવપદધ્યાનેન યત્પ્રાપ્યતે
તન્નૈવાપ્યતિ શબ્દતર્કનિવહૈઃ શાન્તં મનસ્તદ્ભવેત્ ॥ ૮.૮૪॥

અશેષદૃશ્યોજ્ઝિતદૃઙ્મયાનાં સઙ્કલ્પવર્જેન સદાસ્થિતાનામ્ ।
ન જાગ્રતઃ સ્વપ્નસુષુપ્તિભાવો ન જીવનં નો મરણં ચ ચિત્રમ્ ॥ ૮.૮૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં પ્રપઞ્ચસ્ય સર્વનાસ્તિત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૮ । ૮૧-૮૫॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 8 . 81-85..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Sarvanastitvanirupanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*